This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

Checked 2012

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह
दाखल क्र. M 2221 विषय वैदिक
नाव सविवरणो याजुषहोम विचार संक्षेप (मुद्रित)
लेखक / लिपीकार विठ्ठलदेव
पृष्ठ 17 काळ इस. 1914 पूर्ण / अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ श्रीः ॥

श्रीमदप्पाशास्त्रि–विद्यावाचस्पति–विद्यालंकार–महामहोपदेशक–
विरचितः

सविवरणो याजुषहौत्रविचारसंक्षेपः ।

विद्वद्वरेण इदं पुस्तकं अर्पितं

पुण्यपत्तने

वाटवे इत्युपाव्हश्रीकृष्णदीक्षितैः

प्रकाशितः

स च

गोंधळेकरोपाख्येन रावजीसुतेन केशवशर्मणा
स्वीये 'जगद्धितेच्छु' मुद्रणालये
रसाग्निवसुभूमिते शालिवाहनशाके आनन्दनामसंवत्सरे वैशाखमासे सितपक्षे ३ तिथौ
मुद्रितः ।

खिस्ताब्दाः १९१४

प्रकाशकः–श्रीकृष्ण दीक्षित वाटवे, उकिडवे यांचा वाडा मु. सांगली.
मुद्रकः–केशव रावजी गोंधळेकर, जगद्धितेच्छु प्रेस, पुणें.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रस्तावः।

सर्वतो विश्रुतमेतद् याद्विपाश्चिद्वरा अप्पाशास्त्रिमहाशया महाराष्ट्राभिजनमलमकार्षुरिति। येषां विद्वन्मण्डलमण्डनानां गीर्वाणवाण्यां लेखनचातुर्यमुक्तिपाटवं च विलोक्य संतोषभरिता भारतीया भारतीकृतप्रणया एनान् विद्यावाचस्पति--विद्यालङ्कार—महोपदेशकेत्यादिभिरुपाधिभिः सानंदं विभूषयामासुः। अमी साहित्यकोविदाः शास्त्रिणः सौजन्येन विनयेन विनोदेन रसिकतया च मंदारमरंदा इव सुहृच्चंचरीकाणां संतोषसेव्या आसन्।

वर्षद्वयात् प्रागस्मिन् पुण्यपत्तने केनाचित् श्रोत्रियमन्येन वैराजीयेन हिरण्यकेशीयेन सौमिके क्रतौ याजुषहौत्रमेवानुष्ठेयं याजुषैरिति प्रलपता प्रवर्तितः कलहः। उद्वेजिता आश्वलायनीयाः प्रमाणशून्यैः कटुप्रलापैर्महाराष्ट्रभाषायां लिखितैः प्रबंधकैश्च। तदाश्वलायनीयैरभ्यर्थिता अप्पाशास्त्रिणो याजुषहौत्रविचारसंक्षेपं नामश्रुतिप्रमाणसंयुतं सद्युक्तिपरिष्कृतं च मनोहरं प्रबंधं विरचय्य प्रकटतामनैषुः। सोऽप्यधिक्षिप्तः प्रतिपक्षीयेनापशब्दबहुलाभिर्गीभिः। अनुन्नेयार्थश्च कोऽप्याविष्कृतः। ततो विद्यावाचस्पतयः स्वप्रबन्धं भारतवर्षेषु तेषु तेषु प्रधाननगरेषु विद्वदभिप्रायावबोधार्थं प्राहैषुः। ततस्तत्तज्जनपदनिवासिनः संख्यावन्तो विशेषतोऽभिष्टूयैनं प्रबन्धं पूर्वसंप्रदायकथनोल्लसितां स्वानुमतिं प्रैषिषन्। आसीद्विद्यावाचस्पतीनां चेतसि यत्कतिपयदिनविश्रान्तां संस्कृतचन्द्रिकां प्रकाशयामस्तस्यां चेमं विषयं निवेशयामो विद्वदनुमतीश्च सच्छोत्रियेभ्य उपहराम इति। परं मनसा चिंतितं कार्यं दैव मन्यत्र चिंतये दित्याभाणकानुरोधेन महाराष्ट्रीयानां दौर्भाग्येन ग्रांथिकज्वरेणाक्रांतास्ते मर्त्यभूमिमहासिषुः। तेन तैश्चिन्तिताः सर्वे विषया इव सुहृदोऽपि तूष्णींभावमभाक्षुः।

ततः कदचिद्दिनानंतरमाविरभूत्केषां चिन्महाशयानां मनसि विचारो यन्नायं तूष्णीभावः कर्मनिरतानां विदुषामुचितः। विद्यावाचस्पतिभिर्लिखिता ये प्रबन्धाः सान्ति तेऽवश्यं प्रकाशनीया एतदेव सुहृत्कार्य मिति। एवं विचार्य प्रकाशितोऽयं प्रबन्धः श्रौतकर्मानुष्ठानतत्पराणां सच्छ्रोत्रियाणमाभासरूप—याजुषहौत्रपरित्यागमृग्घौत्रकर्तव्यतां चाव बोधयन् विध्युक्ते कर्मणि प्रवर्तयेत। याजुषैर्याजुषहौत्रमेवानुष्ठेयमिति हिरण्यकेशीयानां प्रलापोद्घोषं विश्रमयेत्। याजुषहौत्रविचारसंक्षेपस्याधिक्षेपपङ्कबिंदून् परिमार्जयेत्। सर्वथा यथा यथेमं प्रबन्धं परिषेवेरञ्श्रोत्रियास्तथा तथा ते विध्युक्तकर्माचारिणोभूत्वावश्यं भगवन्तं यज्ञपुरुषं प्रीणयेरन्निति शिवम्।

कुरुंदवाडकरोपाव्हो बाबादीक्षितापरपर्यायः
श्रीकृष्णदीक्षितः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशिवः शरणम् ।

सविवरणो याजुषहौत्रविचारसंक्षेपः ।

१ यद्दचैव हौत्रं क्रियत इति श्रुतिरार्चिकमेव हौत्रं विदधती तदितरप्रयुक्तं तत्प्रतिषेधति । प्राप्तं च प्रतिषिध्यते नाप्राप्तम् ।

समवधारितं याजुषहौत्रस्याननुष्ठेयत्वं संक्षेपात् । तदिदानीं विव्रियते

१ यद्दचैवेति । अत्र कश्चिन्नायं विधिर्यच्छब्दघटितत्वात् । तथा ह्याहुर्यच्छब्दो विधिशक्तिमपहंतीतीत्याह । तन्न । यच्छब्दस्य हि न सार्वत्रिकं विधिशक्त्युपहंतृत्वम् । तदभावस्यापि दृश्यमानत्वात् । अत एव च । 'यदेकस्मिन् यूपे द्वे रशने परिव्ययति तस्मादेको द्वे जाये विंदते' इत्यस्य विधित्वमंगी कुर्वते विद्वांसः । मीमांसका अपि च यदाग्नेयोऽष्टाकपाल इत्यादिवाक्यानां विधित्वमंगी कुर्वंति । यदाह भट्टसोमेश्वरो यदाग्नेयोऽष्टाकपाल इत्यादौ यच्छब्दाद्युपबंधेऽपि विधित्वाभ्युपगमादिति। न्यायवार्तिकतात्पर्यटीकायां वाचस्पतिमिश्रा अपि यदाग्नेयोऽष्टाकपालो भवतीत्यस्य विधित्वमेव प्राहुः । अत एव च ' विधिशक्त्युपहन्तृ स्याद्यच्छब्दादिचतुष्टयम् । प्राप्त्ययोगे तु तद्बाधात्क्वचित्स्यादविहन्तृता॥' इति न्यायसुधा। विवृतं चैतत्कुतूहले। तद्बाधात् तस्य यच्छब्दादिचतुष्टयस्य स्वार्थत्यागादित्यर्थ इति । अत एव चोक्तं वासुदेवाध्वरिणा यच्छब्दादीनां च विधिशक्तिप्रतिबंधकत्वं मानांतरप्राप्तार्थत्व एव । अप्राप्तत्वे तु न तेषां प्रतिबंधकतेति । न खलु मानांतरेण प्राप्तमार्ग्वेदिकं हौत्रं येनात्र यदा विधिशक्तिरुपहन्येत । एवं चात्र यदो विधिशक्तिप्रतिबंधकत्वाभावेन श्रुतेरस्या विधायकत्वमप्रतिहतमेव। अत एव च श्रुतिमेनां व्याचक्षाणो श्रीमन्माधवाचार्य आहुरिति पदं चोदयंतीति व्याचष्टे । नैव तु वदंतीति । चोदना च विध्यपरपर्याया । तदात्मकत्वात्तस्याः । उक्तं च सेश्वरमीमांसायाम् । चोदनेति । विधिनिषेधात्मकः श्रौतो विध्युद्देशः संगृह्यत इति । एवं चाहुश्चोदयंतीति व्याचक्षाणः श्रीमाधवः श्रुतेरस्या विधायकत्वमेवाह नैव पुनस्तदभावम् । ऋगादीनामेव हौत्रादिकरणत्वमित्यत्र हेतुरप्युक्तः। श्रुत्यैव व्यारब्धा त्रयी विद्या भवतीति । त्रयी वेदत्रयरूपा विद्या व्यारब्धा विविच्य (विभज्य) हौत्रादिभिः स्वीकृता भवतीत्यर्थः । हौत्रादिप्रयोजकत्वाद्दगादीनाम् । अत एव चोक्तं मधुसूदनसरस्वतीचरणैः । एवं च कर्मकांडब्रह्मकांडात्मको वेदो धर्मार्थकाममोक्षहेतुः । स च प्रयोगत्रयेण यज्ञनिर्वाहार्थमृग्यजुःसामभेदेन भिन्नः । तत्र हौत्रप्रयोग ऋग्वेदेन । आध्वर्यवप्रयोगो यजुर्वेदेन । औद्गात्रप्रयोगः सामवेदेनेति । आमनंति च स्पष्टमेव कौषीतकिनोऽपि । ' यद्दचैव होता होता भवति । यजुषाऽध्वर्युर-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्वर्युः । साम्नोद्गातोद्गाता ' इति । न चात्रावधारणार्थकैवकारसमभिव्याहाराभावेनैतरेयश्रुतिसमानार्थकत्वाभाव इति वक्तव्यम् । विनाऽप्येवकारमवधारणावगमात् । औत्सर्गिकं ह्यवधारणपरत्वं शब्दानामिति । तदुक्तं विधिवादे शब्दानामवधारणपरत्वस्यौत्सर्गिकतयेति । अत एव चाहुः सर्वं वाक्यं सावधारणं भवतीति । यत्तूक्तमर्थवादरूपत्वमेवास्याः श्रुतेरभिप्रैति विद्यारण्याचार्य इति । तदपि न । तैस्तथानुक्तत्वात् । प्रत्युत विधित्वमेवोक्तमेतस्या एतैरिति नैतत्तिरोहितं प्रज्ञावताम् । एवं चात्र यच्छब्दस्य विध्युपघातकत्वाभावादर्थवादसंबंधाभावाच्छ्रुत्यंतरसंवादाच्च विधायकत्वमेवास्याः श्रुतेरिति सुष्ठूक्तं विदधतीति ।

२ प्राप्तिश्च हौत्रप्रयोजकवदवभासमानत्वान्मंत्राणाम् ।

२ प्राप्तिश्चेति । हौत्रप्रयोजकवद्धौत्रसाधनवदित्यर्थः । साधनं हि साध्ये पुरुषं प्रयोजयत् प्रयोजकं भवतीति । प्रयोजकत्वं च विधायकत्वमिति व्याख्यानं त्वनभिज्ञतामूलकमेव । न किल कश्चिदपि विधायकत्वार्थं प्रयोजकपदं प्रयुंक्त इति । यत्तूक्तं मंत्राणां प्रायेण न विधायकत्वमिति तत्र प्रायेणेतिपदं सत्यं विधायकत्वस्यापि दर्शनात् । 'वसंताय कपिंजलानालभते'इत्यादयो हि विधायका मंत्राः। ब्राह्मणस्यापि विधायकत्वं नैकांतिकम्। तदभावस्यापि संदर्शनात् । उपाख्यानादीनां तथाविधत्वमेव ह्यभिप्रयंति विद्वांसः। एवं च न हि मंत्रत्वब्राह्मणत्वे विधायकत्वाविधायकत्वयोर्बीजम् । किंत्वप्राप्तार्थकत्वतदभावाद्येवेति द्रष्टव्यम्। अत एवोक्तं भट्टाचार्यैर्विधायकत्वाविधायकत्वयोस्तु तयोर्यथोक्तमेव कारणमिति न मंत्रत्वब्राह्मणत्वयोर्व्यापार इति ।

३ यतः किलामीषां हौत्रामर्शत्वव्यपदेशः ।

३ यत इति । यत्पुनरत्रामर्शशब्दविषये प्रोक्तं तन्न समंजसम् । न खलु न भवत्याभास आमर्शः । आमृशत्येव ह्यसावाभासनीयमर्थमिति । भाक्तश्चात्राभासयर्थ आमृशतिरित्यभिद्योतितमेवेदं हौत्रामर्शा हौत्राभासा इत्यर्थ इति विवृण्वता वृत्तिकृता । न च देवस्वामिविरोधः । एकदेशत्ववचनेन कृत्स्नत्वाभावप्रयुक्ताननुष्ठेयत्वज्ञापनयाऽऽभासत्वस्यैवाभिद्योतनात् । कोशास्तु न भाक्तार्थप्रतिपादकाः ।

४ ततश्चाऽऽभासमात्रेण प्राप्तमपि हौत्रत्वमेषां नेति श्रुतेरभिप्रायः ॥

४ तत इति । हौत्रकरणत्वमेषां नेति। एवकारेण व्यावर्तनादितिभावः । यत्तूक्तं मृगारिप्रभृतीनां हौत्रं नार्ग्वेदिकं यजुष्येव तत्पाठादिति तदपि न। आचार्यो ह्याश्वलायनो याज्यादीनामनाम्नाते कल्पनं परिभाषते 'देवतलक्षणा याज्यानुवाक्या' इत्यादिना । एवं च न हौत्रमितरवेदसापेक्षम् । यश्च विधिरेकस्यां शाखायां नोपलभ्येत सोऽयं तत्समानवेदांतःपातिनि शाखांतरेऽनुसंधेयः । दृश्यंते चैतरेयब्राह्मणेऽनुपलभ्यमाना अपि विधयः कौषीतकिब्राह्मण इति ।

५ एतदेवाभिप्रेत्य सूत्रयांचकार तत्र भगवानाचार्य आश्वलायनः 'तद्ये केचन छांदोग्ये वाऽऽध्वर्यवे वा हौत्रामर्शा न तान् कुर्यादकृत्स्नत्वाद्धौत्रस्य' इति ॥

५ एतदिति। यत्पुनरत्रोक्तं न खलु महर्षिराश्वलायन इतरवेदान्तःपातिनां मत्राणां हौत्रकरणत्वं प्रत्याचष्ट इति तन्मन्दम् । ते न कर्तव्या इति कंठत एवोक्तत्वात् । यत्पुनरध्वर्युर्वा यथा स्मरेदिति सूत्रे याजुषहौत्रसाधनमित्युपन्यस्तं तदपि मृगतृष्णीकानुधावनमेवं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न ह्यत्र हौत्रसंबंधगंधोऽपीति। यत्तंत्रमृक्षु एकविंशतौ शाखासु नाम्नातं तद्यजुर्वेदाम्नातमेव स्वीकार्यमित्येतदर्थवाद्धि सूत्रमिदम् । प्रथमवेदशाखास्वनुपलब्धं यजुराम्नातमाश्रयणीयमित्याचष्टे नैव तु मंत्राणामाश्रयणम् । अन्यथा हि देवतलक्षणा याज्यानुवाक्या इत्यनुपदोक्तं सूत्रं वैयर्थ्यमापद्येत । ऋचोऽनूच्य यजुर्भिरेके यजंतीत्येतदपि न मनोरथं पूरयितुं क्षमते प्रतिवादिनः। शक्यमेतद्वृत्तिभाष्यादीनामिव मूलमात्रस्याप्यालोकनेन विज्ञातुम् । एतद्धि कारीरीप्रकरणगतं सूत्रम् । कारीर्यां चेष्टौ केचन बह्वृचशाखिन ऋङ्मयीमनुवाक्यां यजुर्मयीमेव च याज्यां प्रयुंजत इत्यर्थ एतस्य। अत्र ऋग्यजुःशब्दौ न वेदविशेषपरौ । तेषामृग्यत्रार्थवशेन पादव्यवस्थेति लक्षणलक्षिता ह्यत्र ऋक् । शेषे यजुःशब्द इति लक्षणलक्षितमेव च यजुर्ग्राह्यम् । दर्शपूर्णमासादिष्वेवंविधयजुषामुपलंभात् ।

६ न च यजमानशाखामात्रप्रयुक्तं याज्ञिकं कर्म येनाऽऽश्वलायनीयपरत्वमेवास्याः श्रुतेः प्रतीयेत । यागांगकर्मणां हौत्रादीनां तत्तत्प्रधानर्त्विक्शाखाप्रयोज्यत्वात् ।

६ नेति। याज्ञिकं कर्मेति । अत्र च हौत्रादिसापेक्षमेव कर्म याज्ञिककर्मत्वेन विवक्ष्यते। यागांगकर्मणां हौत्रादीनामित्युत्तरत्रोपन्यासात् । एतेन पिंडपितृयज्ञादीनां यजमानशाखामात्रनिर्वर्त्यत्वेऽपि न क्षतिः। अत्र च यजमानशाखायाः प्राबल्यदौर्बल्यविचारोऽप्रासंगिक एव। यथा च यदृचैवेत्यस्याः श्रुतेर्विधायकता तथोपपादितमेव प्रागस्माभिः । तत्राध्वर्यवः कर्माधीयत इति। तत्र तद्विषयकं त्र्यंबकाख्ये कर्मणि यत्कर्मतंत्रं तदध्वर्यवो यजूंष्यधीयत आमनंति। तत्र याजुषं तंत्रमाश्रयणीयमित्यर्थः । एष चाध्वर्युर्वा यथा स्मरेदित्यस्यैव प्रपंचः । तद्ये केचनेति सूत्रं चाऽऽध्वर्यवाणां मंत्राणां हौत्रे प्रयोगं प्रत्याचष्ट इति नैतदनेन विरुद्ध्यत इति द्रष्टव्यम्। येनाध्वर्युर्यजुषा प्रयच्छतीत्यादिश्रुतिरपि ग्रहप्रदानोपादानयोः समानयजुष्करणकत्वमात्रं विदधाति। नैव तु यजुष्करणकत्वं हौत्रस्य । भवति च विभिन्नेष्वपि वेदेषु समानमेव यजुः । यजुष्पदस्यात्र वेदविशेषवाचित्वानभ्युपगमात् । अध्वर्युर्येन यजुषा प्रयच्छति तत्सदृशेन स्वीयवेदगतेन यजुषाऽपरः प्रतिगृह्णातीत्यर्थः । यः पुनरत्र क्रियासमभिहारो यदृचैवेति श्रुतिरर्थवादात्मिकैवेति सोऽयं निरालंबन एवेति ।

७ तत एव च मीमांस्यते सर्वशाखाप्रत्ययमेकं कर्मेति ।

७ तत इति । मीमांस्यते विचार्यते विद्वद्भिरितिशेषः । अत्र हि विचारे मानेः सन् । यथा अमीमांस्यानि शौचानीत्यादौ । अनुशिष्यते च मानेर्जिज्ञासायामिति । जिज्ञासा च विचारः । विद्वद्विचारमनुवदति सर्वेति । व्यारब्धा त्रयी विद्या भवतीति श्रवणात् । स त्रिभिर्वेदैर्विधीयत इत्यादिस्मरणाच्चेति भावः । उच्यते हि यज्ञेश्वरादिभिस्तत्र ऋग्वेदेन हौत्रं यजुर्वेदेनाऽऽध्वर्यवं सामवेदेन चौद्गात्रं कर्म क्रियत इति। एतेनायमत्र मीमांसाशास्त्रोपनिबंध एवेत्याक्षेप्तृमनःकल्पितमिति स्पष्टम् ।

८ ततश्च बह्वृचानामेव होतृत्वस्यानुशिष्टतया हौत्रस्यापि तच्छाखामात्रप्रयोज्यत्वं दुर्वारम्। स्वकर्मणि स्वतंत्रत्वात् । अत एव च हौत्र आम्नायांतरस्य दौर्बल्यम् । यथाऽऽध्वर्यवे प्रथमवेदशाखानाम् ।

८ ततश्चेति । बह्वृचानामिति । ऋग्विदमेव होतारं वृणीष्वेति श्रवणादिति भावः । ऋचो विंदति स्वशाखात्वेनाधीत्य प्राप्नोतीति ऋग्वित् बह्वृचस्तमेवेत्यर्थः । एतेनात्र क्वचिदाचारस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रत्यवस्थानमुपक्षिपन् बलाबलविचारानभिज्ञतामेवाऽऽत्मनः प्रत्याययतीतिध्येयम्।

९ प्रथमवेदशाखानाम्।

९ प्रथमवेदशाखानामिति। ऋक्शाखानामित्यर्थः। कंठत एव चोक्तं प्रथमवेदत्वमृग्वेदस्य श्रीकंठीयभाष्यव्याख्याने दीक्षितचरणैः। प्रपंचसारादिषु च 'अग्निमीळे पुरोहितम्' इत्याद्यवेदाद्यवर्णस्य। योनिः समुद्रो बंधुरिति मध्यवेदमध्यवर्णस्य। समानं वरमित्यंतिमवेदांतिमवर्णस्य च समाहृतिरोमिति पदमिति प्रसिद्धमिति। तदिदानीं पठ्यतां तावद्यजुषामेव प्राथम्यमभिकामयमानेन आक्षेप्त्रा व्यस्त एव प्रणव 'वं' इति। अन्यथा कंठे पाशायेताग्निमीळ इत्यादेर्वेदस्य प्राथम्यमिति। यत्पुनरुक्तं धूलिं प्रक्षिपतैतरेयब्राह्मणगतमृग्वेद एवाग्नेरजायतेत्यादिवचनमुपजीव्याऽऽकाशाद्वायुरित्यादिः किल क्रमः सर्गस्य। तेन चाग्नेः पुत्र ऋग्वेदः। सहोदरश्चाग्नेर्यजुर्वेदः। पितृव्य ऋग्वेदस्येति। तदेतत्परां काष्ठां मात्सर्यस्याभिव्यंजयति। भिन्नः किलाऽऽकाशादीनां सर्गक्रमो भिन्नश्च श्रुत्यभिमतोऽग्न्यादिदेवतोत्पत्तिक्रम इति। यतः किलाग्नेः प्रथमवेदोत्पत्तिर्नायं वायोः संभूतः किंतु पृथिव्या एव। यतश्च यजुषामुत्पादः सोऽयं वायुर्नाऽऽकाशतः संभूतः परं त्वंतरिक्षलोकादेवेति श्रुतिरेवैतदाचष्टे। तथा ह्याम्नातमैतरेयब्राह्मणे। 'प्रजापतिरकामयत प्रजायेय भूयान्स्यामिति। स तपोऽतप्यत। स तपस्तप्त्वेमाँल्लोका नसृजत पृथिवीमंतरिक्षं दिवम्। ताँल्लोकानभ्यतपत्तेभ्योऽभितप्तेभ्यस्त्रीणि ज्योतींष्यजायंताग्निरेव पृथिव्या अजायत। वायुरंतरिक्षादादित्यो दिवः। तानि ज्योतींष्यभ्यतपत्तेभ्योऽभितप्तेभ्यस्त्रयो वेदा अजायंत। ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्यादिति। तान्वेदानभ्यतपत्तेभ्योऽभितप्तेभ्यस्त्रीणि शुक्राण्यजायंत। भूरित्येव ऋग्वेदादजायत। भुव इति यजुर्वेदात्। स्वरिति सामवेदात्। तानि शुक्राण्यभ्यतपत्। तेभ्योऽभितप्तेभ्यस्त्रयो वर्णा अजायंताकार उकारो मकार इति। तानेकधा समभरत्तदेतदोमिति'। इत्थमेव चाऽऽमनंति कौषीतकिनोऽपि। यथा 'सोऽग्निमेवास्माल्लोकादसृजत। वायुमंतरिक्षलोकादादित्यं दिवः। स एतानि त्रीणि ज्योतींष्यभ्यतपत। सोऽग्नेरेवर्चोऽसृजत। वायोर्यजूंष्यादित्यात्सामानीति'। छंदोगा अपि प्रजापतिर्लोकानभ्यतपत्तेषां तप्यमानानाꣳ रसान् प्राबृहदग्निं पृथिव्या वायुमंतरिक्षादादित्यं दिवः। स एतास्तिस्रो देवता अभ्यतपत्तासां तप्यमानानाꣳ रसान् प्राबृहदग्नेर्ऋचो वायोर्यजूंषि सामान्यादित्यादिति। एवं चाग्नेरेव देवताभूतस्याऽऽदित उत्पत्तिस्ततो वायोस्तत आदित्यस्य। तेनैव क्रमेण प्रथमतोऽग्नेर्ऋग्वेदस्य ततो वायोर्यजुषस्तत आदित्यात्साम्नामिति। उक्तं च कंठत एव प्राथम्यमृग्वेदस्य 'ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थम्' इत्यामनद्भिश्छंदोगैः। ऋग्वेदभाष्यभूमिकायां माधवाचार्या अपि नैकश्रुतिप्रदर्शनपुरःसरं प्राथम्यमृचां प्रतिपादयामासुः। मनुरपि 'अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्। दुदोह यज्ञसिद्ध्यर्थमृग्यजुःसामलक्षणम्॥१॥ अकारं चाप्युकारं च मकारं च प्रजापतिः। वेदत्रयान्निरदुहद्भूर्भुवःस्वरितीति च॥' इति। शास्त्रयोनित्वादिति पारमर्षसूत्रभाष्येऽपि श्रीमद्भगवत्पादैरस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेद इति श्रुतिमुदाहृत्य ऋग्वेदादिशास्त्रस्येत्यादिना ऋग्वेदस्याऽऽदित्वमुपन्यस्तम्। सत्यप्येवं सर्वतोमुखमृचां प्राथम्यमसहमानः कश्चित् परिवर्तयतु व्याहृतीर्गायत्रीं च। प्रथमो हि पादो गायत्र्या ऋग्वेदो द्वितीयो यजुस्तृतीयः सामेति। 'त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत्' इति खलु मनुरनुशास्ति। तत्र च प्रथमपादस्यर्ग्वेदरूपतया तदा-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्मकाद्यव्याहृतिसंवलितः स एवाऽऽदित उपदिश्यते हिरण्यकेशीयैरुपनयने बटवे । द्वितीयश्च ततः परं द्वितीयवेदात्मकस्तदात्मकव्याहृतिसंयुक्तः । तृतीयश्च तृतीयवेदात्मा तदात्मकव्याहृतिमुखस्ततः परमेवेति । तथाहि हिरण्यकेशिनां गृह्यम् । 'भूस्तत्सवितुर्वरेण्यम्। भुवो भर्गो देवस्य धीमहि । सुवर्धियो यो नः प्रचोदयादित्यादि । भूर्ऋक्षु त्वाग्नौ पृथिव्यां वाचि ब्रह्मणि ददेऽसौ' इत्यादि च । व्याहृतीनां च ऋगादिरूपत्वमित्थमाम्नायते । 'भूरित्येव ऋग्वेदो भुव इति यजुर्वेदः स्वरिति सामवेद इति । एवं च नैव कथंचिदपि शक्यमपह्नोतुं प्राथम्यमृग्वेदस्य केनापीति निःसंदेहम् । यत्तूक्तं निश्वासरूपत्वाद्भगवतो वेदानां न युक्तः प्राथम्यादिविचार इति । तदेतदलौकिकमेवाभिव्यंजयति बुद्धिवैभवम् । निःश्वासेष्वपि संदृश्यत एव क्रमः प्राथम्यादिः । उक्तश्च भगवत्या श्रुत्या 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेद इत्याद्यया । एवं च वृद्धिमिच्छतो मूलमपि नष्टमिति न्यायेन यजुर्वेदप्राथम्यं कामयमानानां 'वं' इति प्रणवस्य व्यत्यस्तव्याहृतिसावित्र्योश्चानुपदेशादापतितं व्रात्यत्वम् । हंत द्रष्टव्योऽयं दुर्विपाको वेदकुत्सनादिदुष्कृतस्येहैव पातित्यरूपः।

१० न च यदृचैवेत्यर्थवाद एवायमिति भ्रमितव्यं विधायकत्वात्तस्य । न च लटो विधायकप्रत्ययत्वाभावः। उदिते जुहोत्यनुदिते जुहोति यवैर्जुहोति दध्ना जुहोतीत्यादौ लटोऽपि तथाविधत्वस्यातिरोहितमेव स्फुटीभावात् । अस्तु वा क्रियत इति लेट् । किंच न तावदयं गुणवादोऽविरोधान्नानुवादोऽनवधारणान्नापि वा भूतार्थवादः स्तुतिनिंदान्यतरस्वरूपत्वाभावात्। अभ्युपगम्यते च भूतार्थवादस्यापि स्तुतिनिंदान्यतरस्वरूपत्वं संख्यावद्भिः । यथाह विवेकव्याख्यायां श्रीकृष्णचंद्रतर्कालंकारः । 'तयोर्विरोधावधारणयोरभावे भूतार्थवादः । सोऽपि द्विविधः । स्तुत्यर्थवादो निंदार्थवादश्चेति' इति । त्रिविधातिरिक्तस्य चार्थवादस्यानभ्युपगमात् ।

१० नचेति । विधायकत्वात्तस्येति । विधित्वस्य वारयितुमशक्यत्वादिति भावः । यत्त्वत्र महर्षेर्जैमिनेर्वचनमिति यच्छब्दो विधिशक्तिमपहंतीति वचनमुपन्यस्तं तत्परमनभिज्ञभावमेवाऽऽक्षेप्तुरभिद्योतयति । नह्येतद्भगवतो जैमिनेर्वचनमिति । न चापि यदृचैवेत्यस्योक्तमर्थवादत्वं माधवाचार्यैर्न वा वेदेनेति । सत्यप्येवमसत्यमेव प्रलपतः प्रशंसनीय एव शिष्टभावः । नैव पुनरेतद्विस्मरणीयमेतेन यन्नानृतात्पातकं वरमिति ।

११ तुष्यतुन्यायेनार्थवादत्वस्वीकारेऽपि भूतार्थवादस्य स्वार्थे प्रामाण्येन विधायकत्वस्य दुर्वारत्वं तदितरस्य चाविरोधात् । अधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयतीत्यादेरिव विधिकल्पकत्वस्य प्रतिषेधायोगः । यत्तूच्यते विधायकत्वेऽप्यस्य नान्यकरणकत्वव्यावर्तकत्वं विशेष्यसमभिव्याहृतस्यैवैवकारस्यान्ययोगव्यावर्तकत्वात् । नत्विह तथेति तन्मंदम् । अत्रापि विशेष्यसमभिव्याहृतत्वस्य विस्पष्टत्वात् । न च विद्यमानविशेषणनिष्ठप्रकारतानिरूपितत्वसापेक्षविशेष्यताविशिष्टत्वमेव विशेष्यत्वम् । प्रमाणाभावात् । विशेषणार्हत्वं हि विशेष्यत्वम् । अर्हे कृत्यतृचश्चेत्यनुशासनात् । संदृश्यते चैवंविधमेव विशेष्यत्वमादाय प्रयुक्तोऽन्ययोगव्यवच्छेद एवकारः श्रुतिषु। आनंदाध्येव खल्विमानि भूतानि जायंत इत्यादौ ।

११ तुष्यत्विति । तुष्यतु प्रतिपक्ष इति-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्यायेनेत्यर्थः। लक्षितश्च न्यायोऽयं न्यायमंजर्याम् 'प्रतिपक्षोदितं यत्र तत्तोषायोररीकृतम्। निरस्यते बुधैस्तत्र तुष्यतुन्याय इष्यते' इति। तुष्यतु दुर्जन इति न्यायस्तु नात्राभिप्रेतः। अन्यथा हि निर्विशंकमेवोपन्यभन्त्स्यतायामिति। यत्तूक्तं दर्शपूर्णमासहौत्रस्यर्ग्वेदेऽत्यंतमेवाभाव इति तदेतदंधतामेव विस्पष्टयति। संदृश्यतां तावद्विस्फार्यचक्षुषी कौषीतकिब्राह्मणमेतेन। येनावगम्येत दर्शपूर्णमासादिहौत्रस्यर्ग्वेदंगतत्वम्। अनाम्नाते चाऽऽश्वलायनोक्तदिशा हौत्रकल्पनेन साकल्यस्य दुर्निवारत्वात्। ऋग्वेदस्य हौत्रार्थत्वादसौ व्याख्यातो माधवाचार्यैरिति च स्वयमेवोक्तममीभिः। 'आध्वर्यवस्य यज्ञेषु प्राधान्याद्व्यचाकृतः पुरा। यजुर्वेदोऽथ हौत्रार्थमृग्वेदो व्याकरिष्यत' इति। एतेनात्र प्रलपितांतरमप्यपास्तम्।

१२ न च प्रकृतश्रुतिमूलकत्वेऽपि सत्रमात्रविषयकत्वमेवाऽऽश्वलायनीयस्य तद्ये केचनेति सूत्रस्येति भ्रमितव्यम्। इतः प्रागेव परिसमाप्तत्वात्सत्राधिकारस्य। वृत्तौ तु परिसमाप्तिशब्दोऽध्यायावसानसन्निहितप्रदेशवचनः। अन्यथा विरोधापत्तेः। यदि ह्यध्यायांतं यावत्सत्राधिकारः स्यान्नस्यात्तदा तदितरधर्मवत्कर्मादिनिरूपणमिति।

१२ नचेति। इतः प्रागेवेति। एतावत्सात्रं होतृकर्मेत्यनेनेत्यर्थः। न खलु सत्रविषयत्वे दर्शपूर्णमासेत्याद्यग्रिमवृत्तिग्रंथः सांगत्यमापद्येत। अत एव च तत्रेत्यस्य हौत्रकर्मणीत्यर्थो न तु सात्रे हौत्रकर्मणीति। सात्रे हौत्रकर्मणीत्येव तच्छब्दार्थ इति नारायणाशयं प्रतिजानानेन कथं वा संगम्येत तदीय उत्तरग्रंथः प्रज्ञावता। उत्तरस्य च सूत्रद्वयस्यैतदपवादत्वं तद्ये केचनेत्यस्यापवादः सूत्रद्वयमिति वृत्तिकृतैवोक्तम्। यत्तूक्तं नैतत्सूत्रं यदृचैवेत्यादिश्रुतिमूलं ब्रह्मत्वविधानपरत्वाच्छ्रुतेस्तस्या इति। तन्मन्दम्। 'अथ केन ब्रह्मत्वं क्रियते त्रय्याविद्ययेति ब्रूयात्' इत्येषैव हि श्रुतिर्ब्रह्मत्वे त्रय्याः करणत्वविधायिनी नैव तु ऋचैव हौत्रं क्रियत इत्येषाऽपि। तत एव च प्रश्नोत्तराभ्यां ब्रह्मत्वं निर्णेतुमुपक्रमत इत्यवतारितं माधवाचार्यैः। एवं च प्रश्नोत्तरघटितया श्रुत्या ब्रह्मत्वनिर्णयस्तदितरया तु हौत्रादीनामिति सिद्धम्। न खलु यदृचैवेति श्रुतिः प्रश्नोत्तरघटिता येनास्या ब्रह्मत्वनिर्णयपरत्वमाशंक्येत। हौत्रादित्रयनिर्णयपुरःसरमेव तु ब्रह्मत्वमस्यां निर्णीयते। यत्तु प्रलपितं सूत्रस्यास्यैतच्छ्रुतिमूलकत्व आध्वर्यवामर्शादीनामप्यृगादिगतानामननुष्ठेयत्व-मवक्ष्यदिति तन्न हौत्रमात्रनिर्णयप्रवृत्तत्वादाचार्यस्य। तदाह देवस्वामी तत्र मन्त्रब्राह्मणे-ऋग्वेदेन हौत्रं यजुर्वेदेनाऽऽध्वर्यवं सामवेदेनौद्गात्रं सर्वैर्ब्रह्मत्वमिति। तत्र पुरुषशक्तिपरिहारमुपलक्ष्य शौनकादिभिराचार्यैः कल्पाः प्रणीताः। अर्थग्रहणाय शौनकेन भगवता हौत्रकर्म द्वादशभिरध्यायैः परिकल्पितम्। तदधीत्याऽऽचार्येणाऽऽश्वलायनेन ब्राह्मणाः श्राविता इत्यादि। एवं च शास्त्रेऽस्मिन्नधिकृतं होतृकर्मेत्यपि सूचितं भवति। अत एव चाऽऽह तदित्यधिकृतं होतृकर्मोपदिशतीति। न पुनरुक्तं परामृशतीति। अन्यादिदमृग्भिः पुनराध्वर्यवानुष्ठानं न वयमनुमन्यामहे विना श्रुत्यनुज्ञामिति वृथैव तद्विषय आक्षेप्तुरायासः। यत्तु प्रकटितं पांडित्यं तेन श्रुत्याऽनया विधौ निषेधे च वाक्यभेदापत्तिरिति तन्न। एवकारस्य वैयर्थ्यापत्तेः। एवकारो ह्ययोगमन्ययोगमपि वा व्यावर्तयति। न हि पार्थ एव धनुर्धर इत्युक्तौ पार्थस्य धनुर्धरत्वमिव तदितरस्य तदभावो नोच्यते। यदि च नैवकारघटिताद्वाक्यादर्थद्वयं प्रतीयते तदा 'अहमेव गुरुः सुदारुणानामिति हालाहल मा स्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तात दृप्यः। ननु संति भवादृशानि भूयो भुवनेऽस्मिन्वचनानि दुर्जनानाम्' । इत्यादयो महाकविप्रयोगा न संगच्छेरन्। त्वमेव गच्छेत्युक्ते चान्योऽपि प्रयायादप्रतिषेधात्। साधव एव शब्दा वक्तव्या इत्युक्तौ चासाधूनामपि वचनं न वार्येत। किं च नात्र वाक्यभेदप्रसंगोऽप्राप्तपरिसंख्यांगीकारात्। तत एव च न दोषत्रयदूषितत्वमपि। तदुक्तं रसायने दीक्षितचरणैः। परिसंख्यासु प्रसिद्धं दोषत्रयमप्राप्तपरिसंख्यासु न भवतीति। ऋग्विदमेव होतारं वृणीष्वेति गोपथब्राह्मणं तु बह्वृचानामेवानुकूलं नैव तु प्रतिकूलमिति विदांकरोतु ॥

१३ न चैवं वेदभाष्यकृत्कृतो याजुषाणां मंत्राणां याज्यात्वादिनिर्देशो नोपपद्येतेति वक्तव्यम्। तत्सादृश्याद्धि तद्व्यपदेश इति। यथा राजसदृशे राजेति।

१३ न चैवमिति। न खलु श्रुतिषु कुत्रापि प्रोक्तमृग्वेदाभिन्नानां हौत्रसाधनत्वम्। ऋचामेव तु तत्साधनता प्रतिपाद्यते। 'ऋचैव हौत्रं क्रियते' 'ऋचा होता होता भवति' 'ऋग्विदमेव होतारं वृणीष्व' इत्यादिभिः। हौत्रोपयुक्तानां याज्यादीनां याजुषत्वे तु नैतदुपपद्येत। प्रत्युताऽऽम्नायो विरुद्ध्येत। तत एव चाभ्युपेतव्यं गौण्यैव लक्षणया याजुषाणां मन्त्राणां याज्यात्वादिनिर्देश इति। अत एव च प्रोक्तमैतरेयब्राह्मणभाष्योपक्रमे माधवाचार्यैः। ऋग्वेदस्य हौत्रत्वं समाख्याबलात्तृतीयाध्यायस्य तृतीयपादे विचारितम्। 'वेदत्रयोक्तधर्माणामृत्विग्भिः संगतिस्त्रिभिः। अनियत्या नियत्या वा नियतिर्नाऽनिरूपणात्॥१॥ हौत्रत्वादिसमाख्यानं नियतेर्गमकं स्वतः। निर्बाधं चान्यवत्तच्च तेनात्र विनियोजकम्। २। याज्यापुरोऽनुवाक्यादयो धर्मा ऋग्वेदे प्रोक्ताः। दोहननिर्वापादयो यजुर्वेदे। आज्यपृष्ठस्तोत्रपृष्ठादयः सामवेदे। तत्रास्यैवैते धर्मा इति नियामकस्य दुर्निरूपत्वाद्येन केनापि ऋत्विजा यः कोऽपि धर्म इच्छया संगच्छत इति चेन्नैवम्। हौत्रमाध्वर्यवमौद्गात्रमिति समाख्यानेन नियतिर्बोध्यते। न च समाख्यानस्य बाधकं किंचित्पश्याम इति। अग्निमीळ इत्यादिरयमृग्वेदस्तेन हौत्रं कर्तव्यम्। इषेत्वोर्जेत्वेत्यादिर्यजुर्वेदस्तेनाऽऽध्वर्यवं कर्तव्यम्। अग्न आयाहीत्यादिः सामवेदस्तेनौद्गात्रं कर्तव्यमिति चैतरेयारण्यकभाष्ये। एतेन याज्यापुरोनुवाक्यादीनां याजुषत्वमेव भाष्यकाराभिप्रेतमित्याद्यर्थकं प्रलपितं परास्तम्। कांडक्रमेण याज्यादिनिर्देशाभावस्तु प्रथमस्य वेदस्य न दोषाय सारस्वतपाठेऽपि तस्याविपर्यासात्। वेदे क्रमावश्यंभावे प्रमाणाभावाच्च। अक्रमपठितानामपि च कल्पोक्तदिशाऽवगंतुं शक्यत्वात्। तदेतद्विषयकोऽपि निरर्थक एव फटाटोपो विपक्षस्येति। ऋग्भिः शंसंतीति यास्कोक्तिस्तु शंसत्यादिभिर्हौत्रादीन्युपलक्षयंती हौत्रादिकरणत्वमृगादीनामाचष्ट इत्यवबोध्यम्। यजेत्यत्र चाध्वर्युवचने प्रार्थनायां लोट् नाऽऽदेशे। तेन होत्रपेक्षयाऽध्वर्युरेव ज्यायानित्यभिप्रायो निरालंबन एव। अन्यथा यजमानवाचं यच्छेत्यादौ यजमानस्याप्यध्वर्युप्रेष्यतापत्तिः।

१४ अत एव चोक्तमाभासत्वमृग्भिन्नानां हौत्रप्रतिपादकवदाभासमानानामेषां मंत्राणां वृत्तिकृता।

१४ अत एवेति। याजुषमन्त्राणां याज्यात्वादिनिर्देशस्य गुणलक्षणामूलत्वादित्यर्थः। तत्त्वधीजनकत्वे सति तत्कार्यकरणाक्षमत्वं ह्याभासत्वम्। तच्च विद्यत एव याजुषेषु याज्यात्वादिना व्यपदिश्यमानेषु मंत्रेषु। अत एव च कर्तव्यतया दृष्टा इत्येवाह नैव तु कर्तव्यतयाऽऽम्नाता इति। एवं च द्रष्टृमात्रायत्तेयं कर्तव्यदृष्टिर्न तु शास्त्रायत्तेति ध्वन्यते। तत्र च प्रयोजिका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सारूप्यधीरेवेति युक्तमुक्तं हौत्रामर्शानां हौत्राभासत्वं वृत्तिकृता। यः पुनरत्र श्रुतिस्मृतिबलाबलविचार आक्षेप्तुः सोऽयमसमंजसत्वमेवास्यावबोधयतीति द्रष्टव्यम्। नह्यत्र स्मृत्या श्रुतिर्बाध्यत इति। याजुषहौत्रस्य प्रत्यक्षश्रुतिविहितत्वमिति तु भ्रम एव तस्य। तथाविधायाः श्रुतेरेवादर्शनादिति।

१५ याज्यात्वादिविशिष्टत्ववदाभासमानत्वादेव हि रागतः प्राप्तं हौत्रकरणत्वं प्रतिषिध्यतेऽमीषां मंत्राणामृचैवेति भगवताऽऽम्नायेन।

१५ याज्यात्वादिविशिष्टत्ववदिति। ऋग्वेद इव यजुर्वेदादावपि हौत्रोपयुक्तवदवभासमानानां याज्यादिमन्त्राणां दृश्यमानत्वेन ऋचैवेति प्रकृतविध्यभावे विनिगमनाविरहेण यथारुच्यार्चिकभिन्नमपि याज्यादिकं हौत्रसाधनत्वेनोपादीयेतेति तत्प्रतिषेधार्थोऽयं विधिरिति भावः। यत्पुनरत्र रागविषये प्रलपितं तद्रागशब्दार्थानवगममूलकमेव। रागो हि रुचिः। अत एवोक्तं भाट्टरहस्ये 'तज्ज्ञानस्य रुच्यरुच्यात्मकोत्कटरागद्वेषोपयोगित्वस्य सर्वसिद्धत्वात्' इति। रुच्यात्मके चास्मिन्रागे इष्टसाधनताधीजन्याऽऽत्मनस्तुष्टिरेव प्रयोजिका।अत एव चाऽऽत्मनस्तुष्टेरपि प्रामाण्यं विदधते मुनयः 'आत्मनस्तुष्टिरेव च' इति। यत्रैकतरधर्मग्रहणे प्रमाणाभावस्तत्राऽऽत्मनस्तुष्टिरेव प्रयोजिकेत्यर्थः। आत्मनस्तुष्टिरिति तु हेतुहेतुमतोरभेदोपचारात्।तेन तुष्टिप्रयुक्तो राग इत्यर्थः। एवं च श्रौतेऽपि विषये विशेषविज्ञानाभावे रागतः प्रवृत्तिर्दुर्वारेति द्रष्टव्यम्। यदि च नाभविष्यदृचैवेति विधिर्नैव तदा व्यज्ञास्यत विशेष इति सुष्ठूक्तं रागतः प्राप्तमित्यादि। यत्पुनरत्र प्रलपितमेवकारस्याव्यावर्तकत्वमभिप्रेयता पंडितेन। 'जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः। कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते' इत्यत्र सत्येवकारे सति च यच्छब्दाभावेऽर्थवादत्वमेवाभ्युपगतं मेधातिथिना। कुल्लूकोऽप्येवम्। अत्र च वाक्यभेदापत्तिर्बीजम्। यदृचैवेत्यत्रापि च स एव दोषः समानत्वात्। एवकारेण च नान्यव्यावृत्तिर्भवति। अन्यथा हि 'ब्राह्मणस्यैव कर्मैतदुपदिष्टं मनीषिभिः। राजन्यवैश्ययोस्त्वेवं नैतत्कर्म विधीयते' इति मनुवचनमुत्तरार्धं वैयर्थ्यमापद्येत। एवकारेणैव क्षत्रियवैश्यनिवृत्तिलाभात्'इति। तदेतदपि संस्कृतभाषयेव शास्त्रगंधेनापि परिचयाभावमभिद्योतयत्याक्षेप्तुः। तथा हि जप्येनैवेत्यत्रैवकारेणान्यव्यावृत्तौ स्वयमेव मनुनोक्तेभ्यः श्रुत्या च प्रतिपादितेभ्यो विध्यंतरेभ्यस्तिलांजलिप्रदानापत्तिरिति महानेव विरोधः। विरोधे च वचनानामर्थवादत्वमेवांगी क्रियते विरोधप्रयोजकस्य वचनस्य विद्वद्भिः। अत एव च विरोधे गुणवादः स्यादित्याहुः। न चास्ति यदृचैवेत्येवकारेणान्यव्यावृत्तौ विरोधः कोऽपि। न हि ऋचैव हौत्रमितीव यजुषैव हौत्रं यजुषाऽपि हौत्रमित्यादिर्विधिरुपलभ्यते येन विरोधः शंक्येत। लैंगिकस्तु स्वयमेवोद्भाव्यमानो विधिर्न विरोधप्रयोजको दौर्बल्यादिति। ब्राह्मणस्यैवेत्यत्रोत्तरार्धे क्षत्रियादिनिवृत्तिवचनं तु व्यावर्त्यप्रदर्शनमात्रार्थम्। दृश्यते च 'महेश्वरः शंकर एव नापरः' इत्यादिषु महाकविप्रयोगेषु 'त्वामेव ब्रवीमि नान्यम्' इत्यादिषु लौकिकेषु च वाक्येषु व्यावर्त्यप्रदर्शनम्। अत एव चात्र ह्येवावपंतीत्यादिषु स्वी कुर्वतेऽन्यनिवृत्तिं मीमांसका इति भाट्टचिंतामण्यादिषु स्पष्टम्।

१६ न च मंत्राणामेषामृक्शेषत्वेन तत्प्रयुक्तकार्यकारित्वेऽपि दोषाभाव इति वाच्यम्। मुख्याभावे हि प्रतिनिधिः शास्त्रार्थः। प्रथमो हि कल्पः शेषीति। 'प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्तते। न सां-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परायिकं तस्य दुर्मतेर्विद्यते फलम्' इति हि स्मर्यते ॥

१६ नचेति। यजुर्वेदगतस्य ऋक्शेषत्वमेवेति केषांचिद्वचनमुपजीव्य यजुर्मंत्राणामपि केषांचिदृक्कार्यकारित्वमिति व्याहरतां याजुषाणां मतस्यानुवादोऽयं नैव पुनर्विद्यावाचस्पतेः स्वमतम्। एतेन याजुषाणामपि मंत्राणामृक्कार्यकारित्वमिति वाचस्पतेरभिप्राय इति सोल्लुंठनं प्रलपन् पूर्वपक्षत्वसिद्धांततत्त्वाद्यनभिज्ञः परास्तः। मतमेतदभ्युपगम्य दूषयति मुख्याभाव इति। स किल शेषो यः परार्थो भवति शेषः परार्थत्वादित्यनुशासनात्। अत एवाहुर्भट्टाचार्याः। शेषं तस्यैव तं विद्यादुपकारेण लक्षितमिति। परार्थत्वं च तदुद्देशेन प्रवृत्तत्वम्। तत एवोक्तं पार्थसारथिना—तस्मात्पारार्थ्यमेवैकं युज्यते शेषलक्षणम्। परोद्देशप्रवृत्तिश्च पारार्थ्यमभिधीयत इति। तदुद्देशेन प्रवृत्तत्वं च तदभावे तत्कार्यकारित्वमपि। तदभावे तत्कार्यकारित्वं च प्रतिनिधीनां स्फुटमेवेति दुष्परिहरमेव तेषामपि शेषत्वम्। अनुकल्पोऽपि प्रतिनिधिविशेष एव। मुख्यासंभवे प्रतिनिधीयमानत्वात्। एवं च यजुर्गतानामृचामृक्शेषत्वमिच्छतामयमेवाभिप्रायो यत्प्रधानभूतानामृचामनुपलंभे यजुर्गता ऋचः प्रयोक्तुं युक्ता इति। एवं हि ऋगर्थत्वेनासामृक्शेषत्वं चरितार्थमिति। किंच शेषत्वं यजुर्गतानामृचामाचक्षाणैर्ऋक्साध्ये कर्मणि मुख्यतया प्रवृत्तिरासां विनिवार्यते। अन्यथा हि नैताः परार्थाः संपद्येरन्। अत एव च नैव शेषत्वमासेवेरन्निति। एतदेवाभिप्रेत्योक्तं मुख्याभावे हि प्रतिनिधिः शास्त्रार्थ इति शास्त्रीयं वचनम्। यत्पुनरत्रोक्तमंगानामभावेंऽगिनोऽप्यभावः संपद्यते। न हि श्रोत्राद्यवयवाभावे शरीरं नाम शिष्येतेति। तदेतद्विनैव वेदांगाध्ययनं वैदिकंमन्यैः संस्मरणीयं हिरण्यकेशीयैः।

१७ न च स्वीयशाखापरित्यागो दोषायैवेति विप्रतिपत्तव्यम्। हौत्रे कर्माणि यजमानशाखायाः स्वशाखात्वाभावेन तत्परित्यागस्यैवाप्रसक्तेः। प्रत्युत बह्वृचशाखापरित्याग एव स्वशाखापरित्यागलेपो होतुः प्रसज्येतेति। नन्वेवं निष्फलो हौत्रमंत्राणां यजुर्वेदे पाठः प्रसज्येतेति चेत् श्रुतिरेवात्र भगवती प्रष्टव्या।

१७ न च स्वीयेति। याजुषे यजमाने बाह्वृचहौत्रानुष्ठानं स्वशाखापरित्यागप्रयोजकतया शाखारंडत्वापादकमिति केषांचिद्भ्रांतेरयमनुवादः। त्यागो हि प्रसक्तस्यैव संघटते नाप्रसक्तस्य। न हि याजुषं हौत्रं प्रसक्तं तस्य श्रुत्यैव प्रत्याख्यातत्वात्। अतश्च त्यागाभावादेव न शाखारंडत्वम्। ऋग्विदमेव होतारमित्यनेन च बह्वृचशाखीयस्यैव होतृत्वमनुशिष्यते। प्रसक्तं च बाह्वृचं हौत्रं तस्य च परित्यागो दोषायैव। विहितानुष्ठानेन निंदितानुष्ठानेन च पातित्यात्। 'विहितस्याननुष्ठानान्निंदितस्य च सेवनात्। अनिग्रहाच्चेंद्रियाणां नरः पतनमृच्छति' इति स्मरणात्। न हि याजुषहौत्रानुष्ठानमुपन्यस्य यजमानेन होता त्रियते। येन यजमान एव दोषः संक्रामेत्। किंतु हौत्रसामान्यमेव। ततश्च वैधस्य हौत्रस्यानुष्ठानं होतुर्धर्मः। तस्य च परित्यागे स एव दोषभाग्भवति नैव पुनर्यजमानः। अन्यस्यापराधेऽन्यदंडायोगात्। न हि चौरापराधे मांडव्यदंडो न्याय्य इति। तथाविधकर्मविघातजन्यः फलानधिगमः सति संभवेऽनुमंतृत्वजन्यो दोषश्च यजमानस्य संघटेतैवेति।

१८ लैंगिकस्तु विधिः प्रत्यक्षश्रुतिबाधितत्वेन दुर्बलतया समुपेक्षार्ह एव प्रेक्षावताम्।

१८ लैंगिक इति। लैंगिको ज्ञापकसिद्ध आनुमानिक इति यावत्। न किल यजुषा हौत्रं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यजुषापि हौत्रमित्येवंविधा काचिदपि विधायिका श्रुतिः क्वाप्युपलभ्यते। हौत्रोपकरणभूतानां पुनः कासांचिद्याज्यापुरोनुवाक्यानां पाठ उपलभ्यते। तत एव च लिंगात्परैः प्रकल्प्यमानो याजुषहौत्रविधिर्लैंगिको यदृचैव हौत्रमित्यार्चिकस्तु प्रत्यक्षश्रुतिविहितः। यत्तूच्यते 'यदृचैवेति नैषा प्रत्यक्षश्रुतिरर्थवादो ह्येषः। श्रुतिश्च नाम विधायकं ब्राह्मणवाक्यम्' इति। तदेतदनभिज्ञमूर्धन्यतामेवास्यावेदयति। विधायकान्यविधायकान्यपि च मंत्रब्राह्मणादिवाक्यानि वेदांतःपातीनि श्रुतिपदवाच्यानि इति तत्त्वविदां घंटाघोषः। यदृचैवेति श्रुतिरर्थवाद एवेति भ्रम एवायमाक्षेप्तुः। यथाचैतत्तथोपपादितमेवास्माभिः प्राक्।

१९ न च याजुषहौत्रस्य कतिपयजनविहितत्वमेवात्र प्रमाणमित्यसामंजस्याय करावलंबप्रदानं युक्तम्। श्रुत्याद्यपेक्षयाऽऽचारस्य दुर्बलतमत्वात्। तदेवं सर्वथाऽऽर्चिकमेव हौत्रं शास्त्रसंमतं नान्यादिति सिद्धान्तः। विशेषतस्त्वन्यदा सप्रमाणं प्रपंचयिष्याम इति शिवम्॥

श्रीमदप्पाशर्मा विद्यावाचस्पतिः।

१९ नचेति। कतिपयजनविहितत्वं कतिपयजनानुष्ठितत्वम्। विपूर्वो हि धाञनुष्ठाने, इति। एतेन श्रुतिरेव विधातुमधिकारिणीत्यादि प्रलपितं परास्तम्। अत्र च विहितपदस्यानुष्ठानार्थत्वं बालोऽपि शक्नुयादवबोध्दुं विशेषतश्च आचारस्य दुर्बलत्वादित्युत्तरस्मिन्वचने दृष्टिं व्यापारयन्निति। अत्र केचिदेवमाचक्षते यद्धि हौत्रसूत्रं सत्याषाढीयत्वेन व्यपदिश्यते हिरण्यकेशीयैर्न तदार्षमिति। युक्तं चैतत्। कथमन्यथा हौत्रप्रकरणपठनीयानेव कांश्चन विधीन् मंत्रांश्चान्यत्राध्वर्यव उपनिबध्नीयात् सूत्रकारः सत्याषाढः। उपन्यबध्नाच्चैवं जहुपभृतावध्वर्युरादत्ते वेद्ँ होता। दक्षिणेन गार्हपत्यमध्वर्युरतिक्रामत्युत्तरेणेतरौ। तत्सोऽवघ्राय उपह्वयते होता। उपहूतां प्राश्नाति होता। तथा वेदोऽसि वित्तिरसि इति वेद्ँ होता पत्न्यै प्रयच्छति। वेदोऽसि वेदसे त्वा वेदो मे विंदेति वेति च। सति पृथग्घौत्रपाठे द्विरुक्तत्वमापद्येत। न खलु सति तद्विषयके प्रमाणांतरे तत्रैव पठितुं युक्ता विध्यादयः केचिदप्यन्यत्र पठ्येरन्। न हि शयनप्रकरणगता विध्यादयो भोजनप्रकरणे पठ्यन्ते। ये च तद्विभिन्नविषयक एव प्रकरणे पठ्यन्ते ते किल प्रत्याययेयुः स्वतंत्रस्य तद्विषयकस्य प्रकरणस्यात्यंताभावम्। अत एव च प्रतीयते नासीत्सूत्रप्रणयनावसरे सत्याषाढीयतयाऽभिमन्यमानं हौत्रप्रकरणमेतत्। परस्तात्पुनः कैश्चन दुराग्रहग्रहिलैर्बह्वृचविद्वेषवशाद्विनिवेशितमिति। एतेन हौत्रपाठान्यथानुपपत्त्या सत्याषाढीयसूत्रे हौत्रविधिः प्रकल्पनीय इति सुदूरमपास्तम्। गृहीते चैवमृज्व्या धिया पूर्वोक्तो हिरण्यकेशीयविषयकः खंडनसंदर्भः कृत्वा चिन्तया बुभुत्सुबुद्धिवैशद्यप्रयोजन इति ध्येयम्। याजुषहौत्रविचारसंक्षेपो विवृतोऽस्माभिः समासेन। अस्मद्गुरुचरणसूचितायां हौत्रमीमांसायां तु सम्यक् सर्वे विषयाः प्रपञ्चिता ज्ञेया इति शिवम्।

याजुषहौत्रविवादसमये कै० अप्पाशास्त्रिमहाशयैः स्वीयो याजुषहौत्रविचारसंक्षेपः भारतवर्षीयप्रमुखविदुषामभिप्रायार्थं तेभ्यः प्रहित आसीत्। स विचारसंक्षेपः बहुभिः पंडितैः प्रशस्यानुमोदितः पत्रप्रेषणादिभिश्च स्वदेशीयाद्ययावत्कालप्रचलिता पद्धतिः प्राचीनविद्वदनुमतिश्च दर्शिता। एताः संमतीर्विद्यावाचस्पतयो याजुषहौत्रविचारसंक्षेपविवरणेन समं प्रकाशयितुकामा आसन्निति प्रस्तावेऽस्माभिर्निवेदितमेव। अतस्तेषामाशयमनुरुध्य ताः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संमतयोऽधो निवेशिता विद्वद्भिर्विलोकनीया इति प्रार्थयामहे।

पुष्करम् २७–११–१२.

श्रीमदप्पाशास्त्री–राशिवडेकर–विद्यावाचस्पतिः ७४९ सदाशिव पेठ पूना।—

स्वस्ति सौहृदाय। सविनयादरप्रणामं निवेदयति–अहमिदानीमस्मि पुष्करे। द्राविडेष्वपि हौत्रमृचैवानुष्ठीयते तत्रैव पूर्णोपदेशात्। कांचीस्थानां पंडितानामपि इदमेवानुष्ठेयमिति विज्ञायतेऽभिप्रायः। गृह्यसूत्रपुस्तकनामादिकं च पश्चाल्लेखिष्यामि–इति कुशलपत्रप्रतीक्षः।

प्र. भ. अनन्ताचार्यः।

मंजुभाषिणी–संपादकः।

श्रीयुता अप्पाशर्मविद्यावाचस्पतिमहाभागाः सविनयं सानुरागं सप्रमाणं च प्रत्यावेदकः—

अस्मद्देशे हि आर्चिकमेव हौत्रं सोमसंस्थासु समाश्रीयते। कार्तिकसुदि पूर्णिमायां चित्तोरकालहस्ती लक्ष्मीनरसिंहसोमयाजी बहदुरपेठ इत्यत्र–अयं महात्मा चयनं नाम क्रतुविशेषं कृतवान्। तत्र चायंविषयो मया विचाराय प्रहितः। तत्रत्याः पुनरार्चिकमेव हौत्रं दर्शपूर्णमासावारभ्याश्वमेधान्तमनुष्ठेयमस्माभिस्तु यावदनुष्ठेयं तथैव विधीयते। तत्र प्रमाणम् "ऋग्वेदेन हौत्रम्" इत्यादि विलिखितं तैः। इति।

ऋग्वेदेनैव हौत्रमित्यादिकं न याजुषं वचनं परं तु आपस्तंबपरिभाषासूत्रप्रथमखंडीयं सप्तदशं सूत्रम्। यज्ञं व्याख्यास्यामः। स त्रिभिर्वेदैर्विधीयत ऋग्वेदयजुर्वेदसामवेदैः। ऋग्वेदयजुर्वेदाभ्यां दर्शपूर्णमासौ। यजुर्वेदेनाग्निहोत्रम्। सर्वैरग्निष्टोमः। ऋग्वेदेन होता करोति। यजुर्वेदेनाध्वर्युः। सामवेदेनोद्गाता। एतानि सर्वाणि प्रथमखंडीयानि।

ऋग्वेदेनैव हौत्रमित्यादिवचनमैतरेयब्राह्मणे २९ अध्याये ८ खंडे वर्तते। वाक्यमतदवलोकितमेव स्यात् श्रीमद्भिः। तथापि प्रसंगवशात् तद्वाक्यं सायनभाष्यं च विलिख्यते–" तदाहुर्महावदाः। यदृचैव हौत्रं क्रियते यजुषाध्वर्यवं साम्नोद्गीथं व्यारब्धा त्रयी विद्या भवत्यथ केन ब्रह्मत्वं क्रियत इति त्रय्या विद्ययेति ब्रूयात्" ऐतरेयब्राह्मणे वाक्यम्।

सा. भा. तत्तत्र प्रायश्चित्तप्रसंगे महावदा ब्रह्मवादिन आहुश्चोदयंति। महांतं प्रौढं वेदं वदंतीति महावदाः। प्लुतिस्तेषां प्रशंसार्था। यद्यस्मात् कारणात् ऋग्यजुःसामेतिहौत्राध्वर्यवौद्गातॄणां करणात् त्रयी वेदत्रयरूपा विद्या व्यारब्धा विविच्य हौत्रादिभिः स्वीकृता भवति। अथर्ववेदश्च नात्र मिश्रयितुं शक्यते। आहवनीयादिकर्तव्यस्य तत्राभावात्। अथ तस्मात् कारणात् केन साधनेन ब्रह्मत्वं क्रियत इति चोद्यम्। तस्य त्रय्या वेदत्रयरूपया विद्यया ब्रह्मत्वं कर्तव्यमित्युत्तरं ब्रूयात्।

८।१२।१२ } **मार्कंडेयशर्मा।**
पोष्ट गुंटूर, जि. कृष्णा.

॥ श्रीशिवः शरणम् ॥

चंपारण्यम्

१८३४ मार्गशीर्ष १.

स्वस्ति। श्रीमतां सारस्वतसारपारदृश्वनां प्रणयिचूडामणीनाम् अप्पाशास्त्रिमहाशयानां सविधे सप्रमाणं सानुरागं च विज्ञाप्यते—

अधिगतं श्रीमतां प्रणयपत्रम्–जिज्ञासितार्थस्योत्तरम्। अस्मद्देशे पूर्वेषामिदानींतनानां चार्चिकमेव हौत्रमित्याचारः। अस्मत्कुलेऽपि तथैव। यद्यपीष्टिपशुयागयोर्हौत्रं याजुषं विद्यते न तु सोमे। आर्चिकं तु सर्वत्र विद्यते। तत एवाश्वलायनोक्तरीत्याऽकृत्स्नत्वादार्चिकमेव हौत्रमाद्रियते सर्वैरपि। आर्चिकहौत्रानुष्ठातॄणां याजुषाणां नामान्यधिष्ठानानि च।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ वैद्यनाथदीक्षितः
२ सुब्बरामदीक्षितः
३ सुब्रह्मण्यदीक्षितः
४ स्वामिनाथदीक्षितः
५ स्वामिदीक्षितः
—सांगलीपुरम् तंजावरम्
६ बालकृष्णशास्त्रिणः
—तिरुवडी तंजावरम्
७ नारायणस्वामिदीक्षितः
—तिरुत्तिरैपोंडि तंजावरम्
इत्येवमादयो बहवः।

यज्ञस्वामिशास्त्री।

श्री.

नंबर ४५ नक्कल.

प्रोसेडिंग सभा.

सरकारवाडा गोरखी, खाजगी कारखाना.

वाजे होय कीं, श्रीमंत मातुश्री महाराणी-साहेब यांचेकडे पुण्याहून याजुषहौत्रविचार-संक्षेपपत्र आले, त्यावरून सभा होणेकरितां मंडळी येणेंप्रमाणेंः—

सभा प्रसिदेंट—त्र्यंबक ज्योति सो शेंडे.

मटंबर.

१ रघुपति शास्त्रीबावा.
१ विष्णुदेव जोशीबावा.
१ कृष्णशास्त्री वेदभाष्य.
१ पुरुषोत्तम शास्त्रीबावा.
१ त्र्यंबक जोशी.
१ भय्याचार्य गजेंद्रगडकर.
१ बाळुशास्त्री भागवत.
१ गदाधर जोशी, नगरकर.
१ रावजी शास्त्रीबावा.
१ शंकर जोशी, जुन्नरकर.
१ शिवराम शास्त्रीबावा.
१ वासुदेवाचार्य कऱ्हाडकर.
१ अबु जोशी.
१ रघुनाथशास्त्री पंचाक्षरी.
१ निळकंठशास्त्री चौधरी.
१ नरदेव नारायण जोशी.

अग्निहोत्री मंडळी.

१ गणेशभट मोघे, अग्निहोत्री.
१ महादेवभट अग्निहोत्री, आपटे पागा.
१ पापय्या सोमयाजी, अवधानी.
१ बाळू अग्निहोत्री.
१ नारायण अग्निहोत्रीबावा.
१ भालचंद्रशास्त्री.
१ गंगाधरभट गर्दे.

येणेंप्रमाणें एकत्र होऊन ठरलें कीं, अप्पा-शास्त्री विद्यावाचस्पति, मुक्काम पुणें, यांनी हौत्राबद्दल लिहिलेल्या पत्राप्रमाणेंच सर्वांस संमत आहे.

सर्वांच्या सह्या.

सभा प्रेसिदेंट—त्र्यंबक ज्योति शेंडे.
१ वेणिमाधवाचार्य गजेंद्रगडकर.
१ रघुपतिशास्त्री.
१ रावजीशास्त्री वेलणकर.
१ पुरुषोत्तमशास्त्री.
१ वल्लुशास्त्री.
१ शंकर जोशी.
१ गणेश दीक्षित मोघे, अग्निहोत्री.
१ नरदेव नारायण जोशी.
१ भालचंद्रशास्त्री.
१ विष्णुदेव जोशी.
१ शिवरामशास्त्री.
१ त्र्यंबक जोशी.
१ कृष्णशास्त्री वेदभाष्य.
१ रघुनाथशास्त्री पंचाक्षरी.
१ नीलकंठशास्त्री.
१ गंगाधरभट गर्दे.
१ महादेवभट अग्निहोत्री.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ अबू जोशी.

१ गदाधरभट जोशी मुळे, नगरकर.

सदरहू प्रोसेडिंग व याजुषहौत्रविचारपत्र पाठविलें आहे. फक्त. ता. ३।२।१२.

सभा सेक्रेटरी,

अबू जोशी.

श्रीगोपालगुरवे नमः

माघ शु० १ शुक्रवार,

अथ हौत्रनिर्णये विचारः

ऋचैव हौत्रं क्रियते यजुषाध्वर्यवं साम्नोद्गीथम् " ऐ. ब्रा. " ऋग्वेदेन होता करोति यजुर्वेदेनाध्वर्युः " हि सू. " इत्यत्र "ऋचैव हौत्रम्" इत्यादिवाक्यस्थऋग्यजुःसामपदैःऋग्वेदयजुर्वेदसामवेदा एव गृह्यंते न ऋङ्मन्त्रयजुर्मंत्रसाममंत्रा इत्ययमेवार्थः " ऋग्वेदेन होता करोति " इत्यादिहिरण्यकेशिसूत्रवाक्ये स्फुटं लक्ष्यते। एवं जैमिनीयमीमांसासूत्रपाठे तृतीयपादे प्रथमाधिकरणे " श्रुतेर्जाताधिकारःस्यात्। वेदो वा प्रायदर्शनात्। लिंगाच्च। धर्मोपदेशाच्च। नहि द्रव्येण संबंधः ।त्रयी विद्या च तद्विदि। व्यतिक्रमे यथाश्रुतीतिचेत् । न सर्वस्मिन्निवेशात्। वेदसंयोगान्न प्रकरणेन बाध्येत " इति सूत्राणि। एषां शाबरभाष्यमाधवकारिकाविवरणानां तात्पर्यम्। ज्योतिष्टोमप्रकरणे 'उच्चैर्ऋचा क्रियते, उपांशु यजुषा, उच्चैः साम्ना' इति विधिवाक्यम्। तत्रमंत्रवाचकऋगादिशब्दानां प्रयोगः। अतएव उच्चैस्त्वादयो मंत्रधर्माः।एवं यजुर्वेदपठिता ऋचोऽध्वर्युणा प्रयोगे उच्चैस्त्वधर्मेण पठनीया इति पूर्वपक्षं कृत्वा असंजातविरोधित्वेन प्रबलमुपक्रममनुसृत्य तद्वशेनोपसंहारस्य नेतव्यत्वात् । उपक्रमे हि त्रयो वेदा असृज्यंत। अग्नेर्ऋग्वेदो वायोर्यजुर्वेद आदित्यात्सामवेदः । इत्युपक्रमगतवेदशब्दानुसारेण विधिवाक्यगतऋगादिशब्दानां वेदपरत्वम्-इति राद्धांतितम्। अतो यजुर्वेदपठिता ऋच उपांश्वेव पठनीया इत्यादि। तथा तत्रैव ३-३-६ अधिकरणे सूत्रम् " आख्या चैवं तदर्थत्वात् " इति। एतद्भाष्यविवरणकारिकाणामाशयः । याज्यापुरोनुवाक्यादयो धर्मा ऋग्वेदे प्रोक्ताः "तत्रास्यैवैते" इतिनियामकस्य दुर्निरूपत्वाद्येन केनाप्यृत्विजा यः कोऽपि धर्म इच्छया संगच्छत इतिपूर्वपक्षं कृत्वा " हौत्रम् " इतिसमाख्यानियतिर्बोध्यत इति सिद्धांतितम्।

तथा च ऐतरेयब्राह्मणे " प्रजापतिरकामयत।" इत्यादिवेदत्रय्या व्याहृत्याश्चोत्पत्तिमुपक्रम्याग्रे प्रायश्चित्तये प्रजापतेराख्यायिका निगदिता। सा च यथा । "स प्रजापतिर्यज्ञमतनुत तमाहरत्। तेनायजत। स ऋचैव हौत्रमकरोत्। यजुषाध्वर्यवम्।साम्नोद्गीथम्। यदेतत् त्रय्यै विद्यायै शुक्रं तेन ब्रह्मत्वमकरोत्।" इत्यादि कथयित्वाऽनंतरं प्रश्नोत्तरैर्ब्रह्मत्वं निर्णीतम्। तद्यथा— "तदाहुर्महावदाः ३। यदृचैव हौत्रं क्रियते। यजुषाध्वर्यवम्। साम्नोद्गीथम्।व्यारब्धा त्रयी विद्या भवत्यथ केन ब्रह्मत्वं क्रियत इति। त्रय्या विद्ययेति ब्रूयात्" इति। अस्य भाष्यं सायनाचार्यैः कृतम्। तद्यथा—"यद् यस्मात्कारणात् ऋग्यजुःसामेति हौत्राध्वर्यवौद्गात्राणां करणात् त्रयी वेदत्रयरूपा विद्या व्यारब्धा विविच्य होत्रादिभिः स्वीकृता भवति । अथर्ववेदश्च नात्र मिश्रयितुं शक्यते । आहवनीयादिकर्तव्यस्य तत्राभावादित्यादि । " अत्र मंत्रोपांशुत्वाधिकरणवदुपक्रमोपसंहारयोः त्रयीविद्याशब्दो वर्तते । त्रयीशब्दो न मंत्रवाचकः किन्तु ऋग्वेदयजुर्वेदसामवेदानामेव वाचकः। " स्त्रियामृक्सामयजुषी इति वेदास्त्रयस्त्रयी" इति कोशात्।एवम्"ऋचैव हौत्रम्।यजुषाध्वर्यवम्। साम्नोद्गीथम्" । इति वाक्यस्थिता ऋचा यजुषा साम्नेति शब्दा न ऋङ्मन्त्रयजुर्मंत्रसाममंत्राणां वाचकाः" इति निश्चीयते । ऋग्वेदभाष्योपोद्घातेऽपि " आध्वर्यवस्य यज्ञेषु प्राधान्याद्व्याकृतः पुरा । यजुर्वेदोऽथ हौत्रार्थमृग्वेदो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्याकरिष्यते " इति । अतो यजुर्वेद आध्वर्य-वार्थमृग्वेदश्च हौत्रार्थमिति संमतं वेदभाष्य-काराणाम् । पूर्वोक्तैतरेयब्राह्मणवाक्यगतं "व्यारब्धा" इति पदं महत्त्वाक्रान्तम् । व्यारब्धा नाम विविच्य होत्रादिभिः स्वीकृता भवति। होत्रा ऋग्वेदः स्वीकृतः। अध्वर्युणा यजुर्वेदः। उद्गात्रा च सामवेदः इति । इति यथाक्रमं वेदविभागे ब्र-ह्मणः किमपि नावशिष्टमित्यापत्तौ त्रय्यैव ब्रह्मणा कर्माचरणीयामिति निर्णीतम् । अयमेवार्थः " ऋचां त्वः पोषमास्ते " इति ऋङ्मन्त्रस्य भाष्यनिरुक्तयोः सुस्पष्टं विवेचितः। ननु " ऋचैव हौत्रं क्रियते " इत्यादिवाक्यस्यार्थवादत्वे स्वार्थे प्रामाण्याभाव इति चेन्न विरोधाभावाद्गुणभेदा-भावः । किंतु भूतार्थानुवादोऽयम् । भूतार्थानुवा-दस्य स्वार्थे प्रामाण्यमस्त्येव । " अग्निहोत्रं जुहोति " इतिवत् । " ऋचैव हौत्रं क्रियते " इति विध्यर्थे लेट् विधीयते । अस्य विधित्वे " प्रजापतिभिर्देवैर्ऋग्घौत्रं कृतम् " इत्याशया श्रुतिः स्वरसतः संगच्छते ।

एतर्हि ऋग्वेदयजुर्वेदसामवेदानां भेदकलक्ष-णानि तावत्पश्यामः । इमे वेदाः परस्परं भिन्नाः अभिधापृथक्त्वात् । तथाच—माण्डूक्योपनिषदि "द्वे वा विद्ये वेदितव्ये । पराचैवापरा च । तत्रा-परा—ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः" इति पृथगेवेमे निर्दिष्टाः" "ऋचः सामानि जज्ञिरे । छंदांसि जज्ञिरे तस्माद् यजुस्तस्मादजायत"(ऋ.) "ऋचो यजूंषि सामान्यथर्वांगिरसः"(आ.गृ.सू.) इति श्रुतिस्मृत्यादिग्रंथेषु भिन्नत्वं प्रव्यक्तम् । परस्परभेदे निदर्शकास्तेषामसाधारणा धर्मा एव । उदा०

ऋग्वेदे०

१ स्वरमध्यस्थडकारस्य ळकारः०

२ शषसहरेषु अनुस्वारस्याविकारः०

३ इंद्राणीमासुनारिषु=जरसा मरते पतिः०
विश्वस्मादिंद्र उत्तरः० ।

४ हंसः शुचिषद्.....ऋतं,

५ (१ ३) कंपः ।

यजुर्वेदे०

१ स्वरमध्यस्थडकारस्याविकारः

२ शषसहरेषु अनुस्वारस्यानुनासिकः

३ इंद्राणीमासुनारिषु .... जरसा मरते पतिः०

.....

४ हंसः शुचिषद्.....ऋतं बृहत्०

५ कंपाभावः ।

इत्यादि । अयं भेदः केन कदा च कृत इत्यादिविचारपरंपराया दुर्निरूपत्वाद् वेदा अनादय इति मन्यते । तथा तेषां धर्मा अपि अनादयः । एवं च भिन्नधर्मत्वाद् वेदभिन्नत्व-मिति स्पष्टम् । इत्थमृग्वेदधर्मेणैव हौत्रकर्मा-चरणीयमिति सिद्धम्। तद्यजुर्वेदधर्मेण कृतं चेत् कथं युक्तं भवेत् । ऋग्वेदस्थाः केचिन्मन्त्राः सारस्वतकाले दुष्कालस्याधरोत्तरत्वेन यजुर्वेदे प्रविष्टास्तथा यजुर्वेदस्थाः केचन मन्त्रा ऋग्वेदे समाविष्टा इति विचारोऽसारः प्रामाण्याभावात् । ऋचः स ऋच उद्धृत्य ऋग्वेदं कृतवान्प्रभुः। इतिवचनाच्छ्रीमद्वेदव्यासैर्वेदशाखाविभागव्यव—स्थायां कृतायां सत्यामद्यापि वेदेषु परस्परमिश्रण-मस्तीत्येवं कल्पना नोपपद्यते । दुष्काले वेदानां विस्मरणात् सरस्वतीप्रसादभाजः सारस्वतात् केचिदधीतवन्तः । सरस्वतीप्रसादेन सार-स्वतस्य वेदाः करतलामलकवदासन् । अतो यै-र्वेदाविस्मृतास्तांस्तेऽनेन पाठिताः।नात्र मिश्रणस्य संदेहः । सारस्वतस्य सर्वज्ञत्वात् कथं मिश्रणं संभवेत् । सारस्वतपाठस्य भिन्नत्वे वेदशाखा-नन्त्यमेव कारणं युज्यते। परं त्वेतावता मिश्रणस्य कथं संभवः । अस्तु नाम सारस्वतसमये पर-स्परसंमिश्रणं वेदमन्त्राणाम्। परं तु यदिदं मिश्रणं कल्पितं नैतत्सारस्वतात्प्रागासीत् । सारस्वता-त्प्रागृग्वेदश्छंदोरूपो यजुर्वेदो वाक्यरूप इति अंगीकर्तव्यमेव । एवं सति " प्रजापतिर्यज्ञमत-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नुत " तदनंतरम् " देवास्तथाऽतन्वत " एवं सारस्वतसमयपर्यंतं य इष्टवन्तस्तेषां यागेष्वध्वर्युणा पठ्यमानस्यान्वाधानस्य ध्रुवाप्यायनस्य च ऋग्रूपा मंत्रा यजुर्वेदे नाऽऽसन्निति कल्प्यं वा ऋग्रूपमंत्रेण कर्तव्यान्यध्वर्योः कर्माणि तदा नाऽऽसन्निति कल्प्यम् । अथवाऽध्वर्युणा पठ्यमाना भिन्ना एव यजूरूपा मंत्रा आसन्निति कल्प्यम् । एवं चेत्के ते मंत्रास्तेषां च विधायकं वाक्यं किम् । इत्यपि प्रश्नः समुदैति । अथवा विधायकवाक्यमपि तदानीं भिन्नमेवाऽऽसीदिति कल्प्यम् । एवं चेयं कल्पना योगवासिष्ठगतधात्रीकथितबालकाख्यायिकामेवानुसरति । एवं मिश्रणस्याभावे सिद्धे न कोऽपि अन्यवेदस्थमंत्रोऽन्यस्मिन्वेदे प्रविष्टः । किन्तु सृष्ट्युत्पत्तौ वेदाः परमेश्वरमुखादाविर्भवन्ति । सृष्टिप्रलये तत्रैव प्रलीना भवन्ति । पुनः सृष्ट्युत्पत्तौ तथाऽऽविर्भवन्ति प्रलीना भवन्ति चेति क्रमे वेदानां परस्परमिश्रणमिति कल्पनमास्तिकानामनुचितम् । वेदानां नित्यत्वे "यज्ञेन वाचः पदवीयमायन्" इति श्रुतिः प्रमाणम् । अयमेवार्थः "अत एव च नित्यत्वम्" इति वैयासिकसूत्रे श्रीशंकराचार्यैः सविस्तरं विवेचितो वर्तते । इत्थमन्येष्वपि ग्रंथेषु विवेचनमस्तीति विदुषां संमतमित्यलं पल्लवितेन ।

अत्रार्थे नवरेत्युपाभिधस्य कृष्णशर्मणः संमतिः ।

दत्तात्रेय वासुदेवशास्त्री निमुडकराणां च

संमनुते याजुषहौत्रविचारसंक्षेपं वामनाचार्यः क्षीरसागरः ।

मार्गशीर्ष शु. ११ भृ. सं. ६९.

ता. २०।१२।१२.

श्रीनाथद्वारा मेवाडप्रांत ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रस्तावशुद्धिपत्रम्

पत्रम्	स्तंभः	पंक्तिः	अशुद्धम्	शुद्धम्
१	१	२०	पक्षीयेना	पक्षीयेणा
१	१	२०	गींभिः	गींर्भिः
१	२	१	दिविश्रान्तां	दिनविश्रान्तां
१	२	३	सच्छोत्रियेभ्य	सच्छ्रोत्रियेभ्य
१	२	५	ष्ट्रीयानां	ष्ट्रीयाणां
१	२	५	दौर्भाग्येन	दौर्भाग्येण
१	२	९	कदचि	कतिचि
१	२	१२	सान्ति	सन्ति
१	२	१५	त्रियाण	त्रियाणा
१	२	१७	प्रवत	प्रवर्त
१	२	२०	विंदून्	बिंदून्
१	२	२४	कुरुंदवाडकरोपाह्वः	कुरुंदवाडाभिजनः सांगलीनिवासी वाटवे इत्युपाह्वः

सविवरणयाजुषहौत्रविचारसंक्षेपशुद्धिपत्रम्

२	२	२७	ध्यर्य	ध्वर्य
२	२	२८	द्धोत्र	द्धौत्र
२	२	३०	मत्रा	मंत्रा
२	२	३४	तृष्णीका	तृष्णिका
२	२	३	द्धयत	ध्यत
३	२	९	ध्वयु	ध्वर्यु
३	२	२१	वेदे	वेदै
३	२	३०	यथाऽऽध्वर्यवेप्रथम वेदशाखानाम् ।	एतद्वाक्यमत्राधिकमितिज्ञेयम्
४	१	३	प्रथमवेदशाखानाम् ।	यथाऽऽध्वर्यवे प्रथमवेदशाखानाम् ।
५	२	७	जैमिने	जैमिने
७	१	१९	हौत्र	हौत्रं
१०	१	३४	जहु	जुहू
११	१	१९	ावशषं	विशेषं
१३	१	३१	द्गीथम् '	द्गीथम् ' ।
१४	१	२५	निर्दिष्टाः'	निर्दिष्टाः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=04.12.19 12:08
,TRANSFERRED=2019/12/04 at 12:11:54
,PAGES=20
,TYPE=STD
,NAME=S0002290
,Book Name=M-2221-SAVIVARNO YAJUSHHOTRA VICHAR SANCHHEP
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection